# संस्कृत-वार्ता:

दिनाङ्क :-15.12.2025 प्रात: - 06:55

अथ वार्ताः

प्रधानमन्त्री नरेन्द्र मोदी - यात्रा

प्रधानमन्त्री नरेन्द्र मोदी अद्यारभ्य जॉर्डन्, इथियोपिया, ओमानदेशानां यात्रायां भविष्यति । यात्रायाः प्रथमचरणे श्रीमोदी राज्ञः अब्दुल्लाह्-द्वितीय-बिन् अल-हुसैनस्य आमन्त्रणेन जॉर्डनदेशं गमिष्यति । तत्र श्रीमोदी जॉर्डन-भारतयोः सम्बन्धानां सम्पूर्ण-परिधि-समीक्षां अथ क्षेत्रीय-विषयेषु दृष्टिकोणानाम्, आदान-प्रदानं च करिष्यति । प्रधानमन्त्री श्वः स्वस्य प्रथमयात्रारूपेण इथियोपिया-देशं गमिष्यति । अन्तिमपदे प्रधानमन्त्री ओमानदेशं गमिष्यति, यत्र हि द्वयोः देशयोः कूटनीतिक-सम्बन्धस्य स्थापनायाः सप्ततिः वर्षाणि पूर्णानि भवन्ति ।

---------------------------------------

पीएम डाक टिकट:

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् महोदयः ह्यः सम्राट् पेरुम्बिडुगु मुत्तारायर् द्वितीय सुवर्ण मारन् इत्यस्य सम्मानार्थं स्मारक-डाक- चिटिकां विमोचितवान्। अवसरेऽस्मिन् सम्भाषणं कुर्वन् श्री राधाकृष्णन् महोदयः तमिल-संस्कृतेः भाषायाः च विषये प्रशासनस्य निरन्तरं साहाय्यं प्रशंसितवान्। सम्राट् पेरुम्बिडुगु मुथारैयर द्वितीयस्य सम्मानार्थं पोस्टल् स्टाम्प् इति पत्रालय-चीटिकायाः विमोचना-विषये प्रधानमंत्री श्रीमोदी आनन्दं प्राकटयत् । उपराष्ट्रपतिः सीपी राधाकृष्णन्-वर्याय सामाजिकमाध्यमेन उत्तरे प्रधानमन्त्रिणा उक्तं, यत् सम्राट् पेरुम्बिडुगु मुथारैयरः उल्लेखनीयदृष्टिकोणेन, दूरदर्शितया, रणनीतिक-तेजसा च धन्यः उत्तमः प्रशासकः आसीत् । सः न्याये स्वसमर्पणेन प्रसिद्धः आसीत्, तमिलसंस्कृतेः उल्लेखनीयः संरक्षकः च आसीत् । श्रीमोदी सम्राट् पेरुम्बिडुगु मुथारैयर द्वितीयस्य असाधारण-जीवनस्य विषये अध्येतुं युवकानाम् आह्वानमपि कृतवान् ।

----------------------------------------

**भाजपा-अध्यक्षः**

भारतीय-जनता-पार्टीति दलस्य कार्यकारि-समित्या, तत्कालप्रभावेण, वरिष्ठ-दल-नेता श्री-नितिन-नबीनः राष्ट्रिय-कार्याध्यक्ष-रूपेण नियुक्तः । नितिन नबिनः सम्प्रति बिहार-सर्वकारे मन्त्रीरूपेण कार्यं कुर्वन् अस्ति । प्रधानमन्त्री तथा भाजपा वरिष्ठ नेता नरेन्द्र मोदी भाजपादलस्य कार्याध्यक्षरूपेण नियुक्तस्य नितिन-नबिनस्य कृते अभिनन्दनम् कृतवान् ।

----------------------------------------

**रेलमार्गस्य विद्युत्करणम् :**

भारतीय-रेलवे-प्राधिकरणेन प्रायः सम्पूर्णे ब्रॉड-गेज-जाले विद्युत्करणं कृतम् । यत्र हि, पञ्चविंशति-राज्येषु, केन्द्रीय-प्रदेशेषु च ऊन-शतम् प्रतिशताधिकं विद्युत्करणं सम्पन्नम् । रेलमन्त्रालयेन सूचितं, यत्, द्विसहस्राब्दस्य ऊन-विंशतितः पञ्चविंशति-पर्यन्तं त्रयस्त्रिंशत्-सहस्रकिलोमीटर्-तः अधिकः मार्गः विद्युत्प्रवाहितः अभवत् । मन्त्रालयेन सूचितम् यत्, केवलम् अस्मिन् काले विद्युत्कृतं सम्पूर्ण-दूरं जर्मनीदेशस्य सम्पूर्णस्य रेलमार्ग-जालस्य प्रायः तुल्यम् अस्ति, यद्धि, स्वच्छ-कुशल-रेलकर्षणस्य विस्तारीकरणस्य, देशस्य परिमाणं दर्शयति।

----------------------------------------

**कोलकाताजाँचसमितिः-**

पश्चिमबङ्गालराज्ये, शनिवासरे लियोनेल-मेस्सी इत्यस्य क्रीडाङ्गणात् प्रस्थानानन्तरं अराजकतायाः, अथ अग्नि-घटना-सम्बद्धावसरे सेवानिवृत्त-न्यायाधीशस्य आशिम-कुमार-रे इत्यस्य नेतृत्वे अन्वेषण-समितेः सदस्याः साल्ट-लेक् इत्यत्र युवाभारती-क्रीडांगणस्य भ्रमणं कृतवन्तः । न्यायधीशेन प्रोक्तं यत्, अधुना अन्वेषणं प्रारम्भिकपदे अस्ति ।

----------------------------------------

## चतुर्थः ग्राप-सीएक्यूएम :

वायुगुणवत्तायाः दुर्गतेः मध्यं, सम्पूर्णे दिल्ली-एनसीआर-इति राष्ट्रिय-राजधानी-प्रदेशे चरणबद्ध-प्रतिक्रिया-कार्ययोजनायाः, ग्राप्-४ इति, चतुर्थ-चरणं सक्रियम् अस्ति, इत्यतः, वायु-गुणवत्ता-प्रबन्धन-आयोगेन, वायु-गुणवत्तायाः इतोऽपि क्षतिं निवारयितुं अनेकाः उपायाः कृताः सन्ति । ग्राप्-४ इत्यस्य अन्तर्गतं दिल्लीनगरे अन्यराज्येभ्यः बृहत्-वस्तु-वाहनानां प्रवेशः प्रतिषिद्धः अस्ति ।

---

## स्क्वैश- क्रिकेट्

स्क्वैश-क्रीडायां, चेन्नैनगरे भारतेन शीर्षस्थाने स्थितं हाङ्गकाङ्ग-देशं पराजित्य प्रथमं स्क्वैश-विश्वचषकं स्वायत्तीकृतम् ।

---

## पुरुषक्रिकेट्-क्रीडायां,

धर्मशालायां पञ्च-क्रीडा-शृङ्खलायाः तृतीय-टी-२०-क्रीडायां, भारतेन दक्षिण-आफ्रिका-दलं, सप्त-स्तोभकैः पराजितम् । एतेन विजयेन भारतं अधुना पञ्चक्रीडाशृङ्खलायां द्वे-एकम् इति अंक-अन्तरालेन अग्रे वर्तते ।

।।इति वार्ता:।।